(690) " तकि कृच्छ्रजीवने " (I-भ्वादिः-118. अक. सेट्. पर.)
'तकेत् तङ्केद् यथासंख्यं हसने, कृच्छ्रजीवने ॥' (श्लो. 43) इति **देवः** ।
तङ्ककः-ङ्किका, तङ्ककः-ङ्किका, तितङ्किषकः-षिका, तातङ्ककः-ङ्किका; [A]तङ्कन्-न्ती, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककन्दतिवत् (163) ज्ञेयानि ।

(691) " तक्ष त्वचने " (I-भ्वादिः-665. सक. सेट्. पर.) [अ]
'त्वचनम्=संवरणम्, त्वचो ग्रहणं च' इति **सिद्धान्तकौमुदी**। 'ग्रहणमात्रे च' इति द्रुमे ।' इति **धातुकाव्यव्याख्याने** (1-84)।
'स्यात् तक्षतीति त्वचनेऽथ वा श्नौ तक्ष्णोति तक्षेच्च तनूक्रियायाम् ।' (श्लो. 183) इति **देवः**।
तक्षकः-क्षिका, तक्षकः-क्षिका, तितक्षिषकः-षिका, तातक्षकः-क्षिका;
तक्षिता-त्री, तक्षयिता-त्री, तितक्षिषिता-त्री, तातक्षिता-त्री;
तक्षन्-न्ती, तक्षयन्-न्ती, तितक्षिषन्-न्ती; —
तक्षिष्यन्-न्ती-ती, तक्षयिष्यन्-न्ती-ती, तितक्षिषिष्यन्-न्ती-ती; —
—तक्ष्यमाणः, तक्षयिष्यमाणः, — तातक्ष्यमाणः, तातक्षिष्यमाणः;
[1]तट्-तड्-तक्षौ-तक्षः; — — —

---

[अ] इदमिहावधेयम् । 'त्वक्ष त्वचने' इति **क्षीरस्वामि**सम्मतः पाठः । न तु 'तक्ष त्वचने' इति । अत एव, **काशिकावृत्तौ** 'तनूकरणे तक्षः' (3-1-76) इत्यत्र **तक्ष**धातोः तनूकरणेऽर्थे एव पाठात् सिद्धे, 'तनूकरणे' इति विशेषणं किमर्थमित्याशङ्क्य, धातूनामनेकार्थत्वेन अर्थान्तरवृत्तेस्तक्षधातोः श्नुप्रत्ययो न भवतीत्युक्तम् । यदि **तक्ष**धातुः त्वचनार्थे प्रामाणिकः स्यात्, त्वचनार्थकतक्ष-धातोर्व्यावर्तनेन 'तनूकरणे' इति विशेषणस्य सार्थक्यं वदेत् । तथा, **बालमनोरमायामपि**—'न च तक्षूधातोस्तनूकरणार्थकत्वाव्यभिचारात् श्नुविधौ तनूकरणग्रहणं व्यर्थमिति वाच्यम्—अत एव धातुपाठेऽर्थनिर्देशस्योपलक्षणत्वावगमात् ।' इत्युक्तिस्त्वचनार्थकतक्षतेरभावेऽनुकूला भवति । 'सङ्घाते द्वौ म्रक्ष-मृक्ष-त्वचने त्वक्ष कथ्यते ॥' (श्लो. 144) इति **धातुपाठकारिका**ऽपि 'त्वक्ष त्वचने' इति पाठस्यैवानुकूला । सुधियोऽत्र तत्त्वं निर्णयन्तु ।

1. पदान्ते, 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इति कलोपे, 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वे, चर्त्वे च रूपम् ।

A. 'अफक्कतातक्यगुणेन तङ्कता खलध्वबुक्कापरुषे पुरेऽमुना ।' धा. का. 1. 17.